पथ्या क्वाथेन संयुक्तं पयःपानं मदात्यये ।”
इति मदात्ययचिकित्सा ॥

अथ पूगीफलमदात्ययचिकित्सारभ्यते ।
“पूगीफलमदे कम्पो मोहो मूर्च्छा क्लमस्तमः ।
प्रस्वेदो विधुरत्वञ्च लालास्रावश्च जायते ॥
भ्रमक्लमपरीतत्वं विज्ञेयं पूगमूर्च्छिते ।
मानवो लक्षणैरेभिर्ज्ञेयः पूगविमूर्च्छितः ॥
तस्य शीतं जलं पीतं वस्तिवातहितं भवेत् ।
शर्कराभक्षणे देया सुक्ता वा शर्करान्विता ॥
कोद्रवाणां भवेन्मूर्च्छा देयं क्षीरं सुशीतलम् ।
धुस्तूरकमदे देयं शर्करासहितं दधि ॥
फलिनी करवीरश्च मोहिनी मदयन्तिका ।
अन्येषामपि कन्दानां वमनञ्चाशु कारयेत् ॥
पाययेत् शर्करायुक्तं क्षीरं वा दधि शर्कराम् ।”
इति श्रीमहर्षात्रेयभाषिते हारीतोत्तरे तृतीयस्थाने मदात्ययचिकित्सानाम सप्तदशोऽध्यायः ॥)

मदाम्नातः, पुं, ( मदाय मत्ततोद्रेकाय आम्नायते वाद्यते स इति । आ + म्ना + कर्म्मणि क्तः । ) शणढक्का । इति हारावली । २०४ । हातीर उपरेर डङ्का इति भाषा ॥

मदाम्बरः, पुं, ( मदो दानवारि अम्बरमिवास्याच्छादकत्वात् । ) मत्तहस्ती । इति त्रिकाण्डशेषः ॥

मदारः, पुं, ( माद्यति मत्तो भवतीति । मद् + “अङ्गिमदिमन्दिभ्य आरन् ।” उणा० । ३ । १३४ । इति आरन् । ) हस्ती । धूर्त्तः । इति विश्वः ॥ शूकरः । कामुकः । गन्धभेदः । मत्तहस्ती । नृपभेदः । इत्युणादिकोषः ॥

मदाश्मदः, पुं, ( मदाश्मं मदजन्यं अश्मं नेत्ररोगविशेषं ददातीति । दा + कः । ) फलकमत्स्यः । इति त्रिकाण्डशेषः ॥

मदालापी, [न्] पुं, ( मदेन मत्ततया आलपतीति । आ + लप् + णिनिः । ) कोकिलः । इति शब्दमाला ॥

मदाह्वः, पुं, ( मदो मृगमद आह्वा आख्या यस्य । इत्यः । ) कस्तूरी । इति त्रिकाण्डशेषः ॥ ( कस्तूरीशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

मदिरः, पुं, ( मद् + किरच् । ) रक्तखदिरः । इति शब्दचन्द्रिका ॥ मदकरे, त्रि । यथा, ऋग्वेदे । ५ । ६१ । ११ ।
“य ईं वहन्त आशुभिः पिबन्तो मदिरं मधु ॥”
“मदिरं मदकरं मधु ।” इति तद्भाष्ये सायनः ।)

मदिरा, स्त्री ( माद्यतीति । मद् + किरच् । अजादित्वात् टाप् । ) मत्तखञ्जनः । इति शब्दरत्नावली ॥ ( यथा, शाकुन्तले । ३ । ५ ।
“यदि मदिरायतनयनां
तामधिकृत्य प्रहरतीति ।
माद्यत्यनयेति । मद् + “इषि मदीति । उणा० । १ । ५२ । इति किरच् । ) मादकद्रव्यविशेषः । मद इति भाषा ॥ ( यथा,—
“हिक्का-श्वास-प्रतिश्याय-कास वर्च्चोग्रहारुचौ ।
वम्यानाहविबन्धेषु वातघ्नी मदिरा हिता ॥”
इति चरके सूत्रस्थाने १७ अध्यायः ॥
यथाच शान्तिशतके । ४ । २४ ।
“पीत्वा मोहमयीं प्रमोदमदिरामुन्मत्तभूतं
जगत् ।” )

तत्पर्य्यायः । सुरा २ हलिप्रिया ३ हाला ४ परिस्रुत् ५ वरुणात्मजा ६ गन्धोत्तमा ७ प्रसन्ना ८ इरा ९ कादम्बरी १० परिस्रुता ११ कश्यम् १२ मद्यम् १३ । इत्यमरः । २ । १० । ४० ॥ मानिका १४ । इति शब्दरत्नावली ॥ कपिशी १५ गन्धमादनी १६ माधवी १७ कत्तोयम् १८ मदः १९ कापिशायनम् २० । इति जटाधरः ॥ वारुणी २१ मत्ता २२ सीता २३ चपला २४ कामिनी २५ प्रिया २६ मदगन्धा २७ माध्वीकम् २८ मधु २९ सन्धानम् ३० आसवः ३१ अम्दता ३२ वीरा ३३ मेधावी ३४ मदनी ३५ सुप्रतिभा ३६ मनोज्ञा ३७ विधाता ३८ मोदिनी ३९ हली ४० गुणारिष्टम् ४१ सरकः ४२ मधूलिका ४३ मदोत्कटा ४४ महानन्दा ४५ । इति राजनिर्घण्टः ॥ सीधुः ४६ मैरेयम् ४७ बलवल्लभा ४८ । इति भावप्रकाशः ॥ कारणम् ४९ । तत्त्वम् ५० इति कैवल्यतन्त्रम् ॥ मदिष्ठा ५१ परिप्लुता ५२ कल्यम् ५३ स्वादुरसा ५४ शूण्डा ५५ हारहूरम् ५६ मार्द्दीकम् ५७ मदना ५८ देवसृष्टा ५९ कापिशम् ६० अब्धिजा ६१ । इति हेमचन्द्रः । ३ । ५६६ ॥ सा द्वादशविधा यथा,—
“माध्वीकं पानसं द्राक्षं खार्ज्जूरं तालमैक्षवम् ।
मैरेयं माक्षिकं टाङ्कं मधूकं नारिकेलजम् ॥
मुख्यमन्नविकारोत्थं मद्यानि द्वादशैव च ॥”
इति जटाधरः ॥

अस्याः सामान्यगुणाः । सुमधुराम्लत्वम् । कफमारुतनाशनत्वम् । लघुत्वम् । पुष्टिकरत्वम् । हृद्यत्वम् । सारकत्वम् । मदावहत्वञ्च ॥ * ॥ धातकीरसगुड़ादिकृता मदिरा गौड़ी । तद्गुणा यथा । तीक्ष्णत्वम् । उष्णत्वम् । मधुरत्वम् । वातनाशित्वम् । पित्तबलकारित्वम् । दीपनत्वम् । पथ्यत्वम् । कान्तितृप्तिकारित्वञ्च ॥ पुष्पद्रवादिमधुसारमयी मदिरा माध्वी । तद्गुणा यथा । मधुरत्वम् । नात्युष्णत्वम् । पित्तवातनाशित्वम् । पाण्डुकामलगुल्मार्शःप्रमेहशमनत्वञ्च ॥ * ॥ विविधधान्यजाता मदिरा पैष्टी । तद्गुणा यथा । कटुत्वम् । अम्लत्वम् । तीक्ष्णत्वम् । गौड़ीसमत्वम् । वातहरत्वम् । कफकरत्वम् । ईषत्पित्तकरत्वम् । मोहनञ्च ॥ तालादिरसनिर्यासकृता मदिरा सैन्धी हाला च । तद्गुणा यथा । शीतत्वम् । कषायत्वम् । अम्लत्वम् । पित्तहरत्वम् । वातदातृत्वञ्च ॥ * ॥ सर्ज्जतृणरसनिर्यासरूपमदिरागुणाः । शीतलत्वम् । गुरुत्वम् । मोहनत्वम् । बलदत्वम् ॥ हृद्यत्वम् । तृष्णासन्तापनाशकत्वञ्च ॥ * ॥ नानाद्रव्यकदम्बकृता मदिरा कादम्बरी । तद्गुणा यथा । सुमधुरत्वम् । पित्तश्रमहरत्वम् । मदकारित्वञ्च ॥ * ॥ ऐक्षवमदिरागुणौ । शिशिरत्वम् । मदोत्कटत्वञ्च ॥ * ॥ यवधान्यकृतमदिरागुणौ । गुरुत्वम् । विष्टम्भदायकत्वञ्च ॥ शर्कराधातकीतोयकृतमदिरागुणौ । शीतत्वम् । मनोहरत्वञ्च ॥ * ॥ शार्करमद्यगुणाः । हृद्यत्वम् । दीपनत्वम् । मोहनत्वञ्च । इति नानामद्यगुणाः ॥ * ॥ ऋतुविशेषे पेयमदिरा यथा,
“गौड़ी तु शिशिरे पेया पैष्टी हेमन्तवर्षयोः ।
शरद्ग्रीष्मवसन्तेषु माध्वी ग्राह्या न चान्यथा ॥
कादम्बरीशर्करजादिमद्यं
सुशीतलं हृद्यकरं मदाढ्यम् ।
माध्वीसमं स्यात् तृणवृक्षजातं
मद्यं सुशीतं गुरु तर्पणञ्च ॥
अन्यथा कुरुते पानं मद्यं सन्तापशोषदम् ।
अन्नदोषमदात्यादिकारकं मूर्च्छनञ्च यत् ॥”
नवजीर्णमद्ययोर्गुणाः ।
“मद्यं नवं सर्व्वविकारहेतुः
सर्व्वन्तु वातादिकदोषदायि ।
जीर्णन्तु सर्व्वं सकलामयघ्नं
घर्णप्रदं हृद्यकरञ्च दीपनम् ॥”
अन्यच्च ।
“पर्य्युषितमल्पमेलनमम्लं वा पिच्छिलं विगन्धं वा ।
दोषावहमविशेषान्मद्यं हृद्यं विवर्ज्जयेत् ॥
मद्यप्रयोगं कुर्व्वन्ति शूद्रादिषु महार्त्तिषु ।
द्विजैस्त्रिभिस्तु न ग्राह्यं यद्यप्युज्जीवयेन्मृतम् ॥”
इति मद्यवर्ज्यावर्ज्यम् ॥ * ॥
“अन्ये द्वादशधा मद्यभेदानाहुर्मनीषिणः ।
उक्तस्यान्तर्भवन्तीति नान्येषां पृथगीरितम् ॥”
इति राजनिर्घण्टे मद्यप्रकरणम् ॥

अथ मतान्तरे मद्यस्य लक्षणं गुणाश्च ।
“पेयं यन्मादकैर्लोकैस्तन्मद्यमभिधीयते ।
यथारिष्टं सुरा सीधुरासवाद्यमनेकधा ॥
मद्यं सर्व्वं भवेदुष्णं पित्तकृत् वातनाशनम् ।
भेदनं शीघ्रपाकञ्च रूक्षं कफहरं परम् ॥
अम्लञ्च दीपनं रुच्यं पाचनं चाशुकारि च ।
तीक्ष्णं सूक्ष्मञ्च विशदं व्यवायि च विकाशि
च ॥”

अथारिष्टलक्षणं गुणाश्च ।
“पक्वौषधाम्बुसिद्धं यन्मद्यं तत् स्यादरिष्टकम् ।”
अरिष्टं मद्यमिति लोके । यथा, द्राक्षारिष्टम् । दशमूलारिष्टम् । बब्बूलारिष्टमिति ।
“अरिष्टं लघुपाकेन सर्व्वं तच्च गुणाधिकम् ।
अरिष्टस्य गुणा ज्ञेया बीजद्रव्यगुणैः समाः ॥”
अथ सुराया लक्षणं गुणाश्च ।
“शालिषष्टिकपिष्टादिकृतं मद्यं सुरा स्मृता ।
सुरा गुर्व्वी बलस्तन्यपुष्टिमेदःकफप्रदा ।
ग्राहिणी शोथगुल्मार्शोग्रहणीमूत्रकृच्छ्रनुत् ॥”
अथ सुराभेदो वारुणी तस्या लक्षणं गुणाश्च ।
“पुनर्नवाशिलापिष्टैर्व्विहिता वारुणी स्मृता ।
संहितैस्तालखर्ज्जूररसैर्या सापि वारुणी ॥
सुरावद्वारुणी लघ्वी पीनसाध्मानशूलनुत् ॥”
सुरातो भेदार्थं लघ्वीति ॥ * ॥
अथ सीधुद्वयस्य लक्षणं गुणाश्च ।
“इक्षोः पक्वै रसैः सिद्धः सीधुः पक्वरसश्च सः ।